Vidūshaka.—Because it belongs to some one else, of course.

---

[1] A bird that lives on rain-drops. Its peculiar habits are a subject of frequent reference in Sanskrit poetry.

[2] Tārānātha takes it, those who (like me) are stupid, have to depend upon the satisfaction of the learned, and take their opinions from them.

[3] *i.e.*, that of Haradatta's pupil. The queen, of course, objects out of jealousy.

Funding by IKS-MoE

देवी—(आचार्यं विलोक्य) अज्ज गणदास ! णं दंसिदोवदेसा दे सिस्सा । [आर्य गणदास ! ननु दर्शितोपदेशा ते शिष्या ।]

गणदासः—वत्से ! एहि गच्छाव इदानीम् ।

(मालविका सहाचार्येण निष्क्रान्ता)

विदूषकः—(जनान्तिकम्) एत्तिओ मे मदिविहवो भवंतं सेविदुं । [एतावान्में मतिविभवो भवन्तं सेवितुम् ।]

राजा—अलमलं परिच्छेदेन । अहं हि

भाग्यास्तमयमिवाक्ष्णोर्हृदयस्य महोत्सवावसानमिव ।
द्वारपिधानमिव धृतेर्मन्ये तस्यास्तिरस्करिणीम् ॥११॥

विदूषकः—(जनान्तिकम्) साहु, तुमं दलिद्दो विअ आदुरो वेज्जेण ओसदं दीअमाणं इच्छसि । [साधु, त्वं दरिद्र इवातुरो वैद्येनौषधं दीयमानमिच्छसि ।]

Queen (*looking towards Gaṇadāsa, the teacher of dancing*).—Noble Gaṇadāsa, in truth, your pupil has exhibited the proficiency you have imparted to her.

Gaṇadāsa.—My dear child, now leave the theatre.

[*Mālavikā departs with her teacher.*

Vidūshaka.—This much and no more can my genius do to help your Majesty.

King.—Have done with this limiting of your power.[1] For, now I consider her disappearance behind the curtain[2] to be like the obscuration of the prosperity of my eyes, like the end of the great feast of my heart, like the closing of the door of happiness. (11)

Vidūshaka.—Bravo! You are like a man, who is poor and sick, and desires a medicine administered by the physician.

---

[1] Bollensen reads *parichchhadena*, in the sense of concealment. Do not pretend that your invention is exhausted.

[2] Bollensen and Kāṭayavema read *tirasharaṇaṃ*, disappearance,

Funding by IKS-MoE

(प्रविश्य)

हरदत्तः— देव ! मदीयमिदानीं प्रयोगमवलोकयितुं क्रियतां प्रसादः ।

राजा—(आत्मगतम्) अवसितो दर्शनार्थः । (दाक्षिण्यमवलम्ब्य, प्रकाशम्) हरदत्त ! ननु पर्युत्सुका एव वयम् ।

हरदत्तः—अनुगृहीतोऽस्मि ।

(नेपथ्ये)

वैतालिकः—जयतु जयतु देवः । उपारूढो मध्याह्नः । तथा हि

पत्रच्छायासु हंसा मुकुलितनयना दीर्घिकापद्मिनीनां
सौधान्यत्यर्थतापाद्वलभिपरिचयद्वेषिपारावतानि ।
बिन्दुत्क्षेपान्पिपासुः परिसरति शिखी भ्रान्तिमद्वारियन्त्रं
सर्वैरुस्रैः समग्रैस्त्वमिव नृपगुणैर्दीप्यते सप्तसप्तिः ॥१२॥

Haradatta (entering).—King ! have the goodness now to look at my exhibition.

King (to himself)—My object in being a spectator is now at an end. (*Aloud, putting a severe strain upon his politeness.*) Haradatta, we are indeed anxious to behold it.

Haradatta.—I am highly favoured.

A bard chants behind the scenes.

Victory to the King ! Noon has arrived, for the geese rest with closed eyes in the shade of the leaves of the lotuses of the ornamental water ; the pigeons shun on account of the extreme heat the sloping roofs of the palace which they ordinarily frequent,[1] the peacock, desirous of drinking the particles of water continually flung out,[2] flies to the revolving water-wheel, the sun blazes with all his rays at ones, as thou with all thy princely qualities. (12)

---

[1] Literally, on account of the extreme heat the palace has become such that the pigeons hate to frequent the sloping roofs.

[2] I have translated *vindūtkshepān* the reading of Shankar Pandit. Tārānātha reads *vindūtkshepāt*, the thirsty peacock flies to the revolving water-wheel, because it throws out drops,

विदूषकः—अविहा अविहा, बम्हणस्स भोअणवेला संवुत्ता। अत्तहोदो वि उइदवेलादिक्कमे चिइच्छआ दोसं उदाहरंति (हरदत्तं विलोक्य) हरदत्त ! किं दाणिं भणासि ? [अवधि अवधि, ब्राह्मणस्य पुनर्भोजनवेलोपस्थिता। अत्रभवत उचितवेलातिक्रमे चिकित्सका दोषमुदाहरन्ति। हरदत्त ! किमिदानीं भणसि ?]

हरदत्तः—नास्ति मद्वचनस्यान्यस्यावकाशोऽत्र।

राजा—तेन हि त्वदीयमुपदेशं श्वो वयं द्रक्ष्यामः। विश्राम्यतु भवान्।

हरघत्तः—यदाज्ञापयति देवः। (इति निष्कान्तः)

देवी—णिव्वट्टेदु अज्जउत्तो मज्जणविहिं। [निर्वर्तयत्वार्यपुत्रो मज्जनविधिम्।]

विदूषकः—भोदि ! विसेसेण पाणभोअणं तुवरावेहि। [भवति ! विशेषेण पानभोजनं त्वरय।]

Vidūshaka.—Oh ! Ho ! the time of breakfast has arrived for the Brāhman and for your Majesty also. The physicians say that it is bad for the health to be kept waiting past the appointed hour.

King.—Haradatta ! what do you say ?

Haradatta.—It is no time for me to speak.[1]

King (looking towards Haradatta).—Then we will see your skill in teaching exhibited to-morrow. In the meantime take rest.

Haradatta.—As the King commands.

[*Exit Haradatta.*

Queen.—Let my husband take the customary bath.

Vidūshaka.—Never mind the bath ! Let breakfast come with express speed !

---

[1] Bollensen reads *Asti vānyasya vachanāvakāśotra*. This seems to mean, is there really an opening for another to speak ? The matter requires no words ; it is self-evident.

Funding by IKS-MoE

परिव्राजिका—(उत्थाय) स्वस्ति भवते। (इति सपरिजनया देव्या सह निष्क्रान्ता)

विदूषकः—भो वअस्स ! ण केवलं रूवे, सिप्पे वि अद्दुदोआ मालविआ। [भो वयस्य ! न केवलं रूपे, शिल्पेऽप्यद्वितीया मालविका।]

राजा—वयस्य !

अव्याजसुन्दरीं तां निज्ञानेन ललितेन योजयता।
परिकल्पितो विधात्रा बाणः कामस्य विषदिग्धः॥ १३॥

किं बहुना, सखे ! चिन्तयितव्योऽस्मि।

विदूषकः—भवदा वि अहं। दिढं विपणिकंदू विअ मे हिअअब्भंतरं दज्झइ। [भवताप्यहम्। दृढं विपणिकन्दुरिव मे हृदयाभ्यन्तरं दह्यते।]

राजा—एवमेव भवान्सुहृदर्थेऽरि त्वरताम्।

Parivrājikā (rising up).—Health to your Majesty !

[*Exit with the Queen, who is accompanied by her attendants.*]

Vidūshaka.—Ha ! not only in beauty but in artistic skill is Mālavikā unmatched.

King—The Creator, by furnishing her, who is so naturally beautiful, with attractive accomplishments, prepared an arrow of love steeped in poison. Why should I say more ? You must think upon me. (13)

Vidūshaka.—You ought also to take thought for my comfort. The inside of my stomach burns like a cauldron in the market-place.

King.—Of course. But exert yourself for the sake of your friend as you do for your food,

विदूषकः—गहीदक्खणोम्हि। किंतु मेहावलीणिरुद्धा जोण्हा विअ पराहीणदंसणा तत्तहोदी मालविआ। भवं वि सूणोपरिसरचरो विहंगमो विअ आमिसलोलुओ भीरुओ अ। ता अणादुरो भविअ कज्जसिद्धिं पत्थअंतो मे रोअसि। [गृहीतक्षणोऽस्मि। किन्तु मेघावलीनिरुद्धा ज्योत्स्नेव पराधीनदर्शना तत्रभवती मालविका। भवानपि सूनापरिसरचर इव गृध्रो आमिषलोलुपो भीरुकश्च। तस्मादनातुरो भूत्वा कार्यसिद्धिं प्रार्थयमानो मे रोचसे।]

राजा—कथमनातुरो भविष्यामि ?

सर्वान्तःपुरवनिताव्यापारप्रतिनिवृत्तहृदयस्य।
सा वामलोचना मे स्नेहस्यैकायनीभूता॥ १४॥

(इति निष्क्रान्ताः सर्वे)

इति द्वितीयोऽङ्कः।

Vidūshaka.—I have pledged my word.[1] But it depends upon the will of another, whether one can see the Lady Mālavikā. She is like the moon-light obscured by clouds. As for your Majesty, you amuse me by asking that your wishes may be accomplished, having become quite distressed, like a bird hovering round the shop of a butcher, desirous of meat, but afraid to venture.

King—Friend, how can I help being distressed, since my heart is averse to the society of all the beauties of my harem, and that fair-eyed one has become the only object of my affection ? (14)

[*Exeunt omnes.*

Here ends the Second Act.

---

[1] Shankar Pandit explains the origin of this phrase. In the formula, inviting Brāhmans to the ceremony of the Śrāddha, the word *kshaṇa* is often used. Hence, the person who addresses in the words of the formula (the *Śrāddhakṛit*) is said to give the *kshaṇa*, and the person to whom it is addressed is said to take the *kshaṇa* in the language of ignorant priests. Tarānātha reads *gṛihitadakshino'smi*, I have received the reward (usually given to Brāhmans at the end of a sacrifice).

Funding by IKS-MoE

तृतीयोऽङ्कः

(ततः प्रविशति परिव्राजिकायाः परिचारिका समाहितिका)

समाहितिका—आणत्तम्हि भअवदीए—समाहिदिए ! देवस्स उवाअणत्थं बीअऊरअं गेण्हिअ आअच्छ त्ति । ता जाव पमदवणपालिअं महुअरिअं अण्णेसामि । (परिक्रम्यावलोक्य) एसा तवणीआसोअं ओलोअंती महुअरिआ चिट्ठदि । ता जाव णं उवसप्पामि । [आज्ञप्तास्मि भगवत्या–समाहितिके ! देवस्योपवनस्थं बीजपूरकं गृहीत्वागच्छेति । तद्यावत्प्रमदवनपालिकां मधुकरिकामन्विष्यामि । एषा तपनीयाशोकमवलोकयन्ती मधुकरिका तिष्ठति । तद्यावदेनामुपसर्पामि ।]

(ततः प्रविशत्युद्यानपालिका)

समाहितिका—(उपसृत्य) महुअरिए ! अवि सुहो दे उज्जाणव्वावारो ? [मधुकरिके ! अपि सुखस्त उद्यानव्यापारः ?]

मधुकरिका—अम्हो समाहिदिआ । सहि ! सागदं दे । [अहो समाहितिका । सखि ! स्वागतं ते ।]

ACT III.

Enter Samābhṛitika, an attendant of the Parivrājikā.

Samābhṛitikā—I have received the following order from the Reverend Lady : "Bring me a citron, for I wish to make a complimentary present."[1] So I will go and look for Mādhukarikā, the keeper of the pleasure-garden. (*Walking round and looking.*)

Ah ! there stands *Madhukarika* contemplating a golden Aśoka tree. So I will go and salute her.

Enter the keeper of the garden,

Samābhṛitikā (*going up to her*).—Madhukarikā ! Is your duty of looking after the shrubbery going on well !

Madhukarikā.—Why, here is Samābhṛitikā. Welcome to you, my friend.

---

[1] Tārānātha and Bollensen give *devassa uvavaṇthaṃ* a citron in the garden of the King.

समाहितिका—हला ! भगवदी आणवेदि अरित्तपाणिणा अम्हारिसजणेण तत्तहोदी देवी देक्खिदव्वा, ता बीअपूरएण सुस्सूसिदुं इच्छामित्ति । [सखि ! भगवत्याज्ञापयति ! अरिक्तपाणिनास्मादृशजनेन तत्रभवती देवी द्रष्टव्या, तद्बीजपूरकेण शुश्रूषितुमिच्छामीति ।]

मधुकरिका—णं संणिहिदं बीजपूरअं । कहेहि दाव अण्णोण्णसंघरिसिदाणं णट्टाअरिआणं उवदेसं देक्खिअ कदरो भअवदीए पसंसिदोत्ति ? [ननु संनिहितं बीजपूरकम् । कथय तावदन्योऽन्यसंघर्षितयोर्नाट्याचार्ययोरुपदेशं दृष्ट्वा कतरो भगवत्या प्रशंसित इति ।]

समाहितिका—दुवे वि किल आअमिणा पओअणिउणा अ । किंतु सिस्साए मालविआए गुणविसेसेण गणदासस्स उवदेसो पसंसिदो । [द्वावपि किलागमिनौ प्रयोगनिपुणौ च । किंतु शिष्याया मालविकाया गुणविशेषेण गणदासस्योपदेशः प्रशंसितः ।]

मधुकरिका—अह मालविआगदं कौलीणं कीरिसं सुणीअदि ? [अथ मालविकागतं कौलीनं कीदृशं श्रूयते ?]

Samābhritikā.—Listen ! The Reverend Lady commands —"Her Majesty the Queen must not be approached by people like myself with empty hands, therefore I wish to honour her with the gift of a citron."

Madhukarikā.—Surely, here is a citron near you. Just tell me now, which of the two professors of dancing, who were quarrelling with one another, did the Reverend Lady approve of, after beholding the performances of their pupils ?

Samābhritikā.—Both of them are throughly acquainted with the science of dancing. and clever in execution. But the teaching power of Gaṇadāsa was ranked the higher of the two on account of the admirable qualities of his pupil.

Madhukarikā.—Well, is there any gossip going about with regard to Mālavikā ?

समाहितिका—बाढं खु तस्सि साहिलासो भट्टा। किंतु केवलं देवीए धारिणीए चित्तं रक्खंतो अत्तणो पहुत्तणं दंसेदि। मालविआ वि इमेसु दिअसेसु अणुहूदमुत्ता विअ मालदीमाला मिलाअमाणा लक्खीअदि। अदो वरं ण जाणे, विसज्जेहि मं। [बाढं खलु तस्यां साभिलाषो भर्ता। किंतु केवलं देव्या धारिण्याश्चित्तं रक्षन्नात्मनः प्रभुत्वं दर्शयति। मालविकाप्येषु दिवसेष्वनुभूतमुक्तेव मालतीमाला म्लाना लक्ष्यते। अतः परं न जाने, विसृज माम्।]

मधुकरिका—एदं साहावलंबिदं बीअपूरअं गेण्ह। [एतच्छाखावलम्बितं बीजपूरकं गृहाण।]

समाहितिका—तह (इति नाट्येन बीजपूरकं गृहीत्वा) हला ! तुमं वि अदो पेसलदरं साहुजणसुस्सूसाए फलं पावेहि। [तथा। सखि ! त्वमप्यतः पेशलतरं साधुजनशुश्रूषायाः फलं प्राप्नुहि।] (इति प्रस्थिता)

मधुकरिका—हला ! समं जेव्व गच्छम्ह। अहं वि इमस्स चिराअमाणकुसुमोग्गमस्स तवणीआसोअस्स दोहलणिमित्तं देवीए णिवेदेमि। [सखि ! सममेव गच्छावः। अहमप्यस्य चिरायमाणकुसुमोद्गमस्य तपनीयाशोकस्य दोहदनिमित्तं देव्यै निवेदयामि।]

Samābhṛitikā.—Certainly. The King is desperately in love with her, but in order to spare the feelings of Queen Dhāriṇī, he does not display the strength of his passion. Mālavikā, too, in these days is seen to be fading like a jasmine-garland that has been worn and thrown away.[1] More than that I do not know. Give me leave to depart.

Mádhukarikā.—Take this citron hanging on the branch.

Samābhṛitikā (pretending to take it).—Ah ! may you obtain, for your readiness to oblige my saintly mistress, a better[2] fruit than this.

Madhukarikā (advancing).—Friend ! we will go together. I also will give the Queen information about this golden Aśoka-tree, which is delaying to burst into blossom, because it waits to be touched by the foot of a beautiful woman.[3]

---

[1] Tārānātha has the Prākrit equivalent of *anubhūtamūrchchheva*, that has suffered fading.

[2] Tārānātha and Bollensen read *pesalaaraṃ*, more tender.

[3] This fancy is perpetually recurring in Sanskrit poetry.

समाहितिका—जुज्जइ, अहिआरो खु तुह। [युज्यते, अधिकारः खलु तव।]

(इति निष्क्रान्ते)

इति प्रवेशकः।

(ततः प्रविशति कामयमानावस्थो राजा विदूषकश्च)

राजा—(आत्मानं विलोक्य)

शरीरं क्षामं स्यादसति दयितालिङ्गनसुखे
भवेत्सास्रं चक्षुः क्षणमपि न सा दृश्यत इति।
तया सारङ्गाक्ष्या त्वमसि न कदाचिद्विरहितं
प्रसक्ते निर्वाणे हृदय ! परितापं व्रजसि किम् ? ॥ १ ॥

विदूषकः—अलं भवदो धीरदं उज्झिअ परिदेविदेण। दिट्ठा खु मए तत्तहोदीए मालविआए पिअसही बउलावलिआ। सुणाविदा अ मह जं भवदा संदिट्ठं। [अलं भवतो धीरतामुज्झित्वा परिदेवितेन। दृष्टा खलु मया तत्रभवत्या मालविकायाः प्रियसखी बकुलावलिका। श्राविता च मया यद्भवता संदिष्टम्।]

Samābhritikā.—Quite proper. Indeed, it is your duty. [*Exeunt.*

Here ends the Interlude.

Enter the King in a love-sick state, and the Vidūshaka.

King.—My body may be thin as it has not the joy of embracing the beloved; my eye may be filled with tears because she is not seen by it even for a moment; but thou, my heart, are not separated for a single instant from that antelope-eyed one; why then dost thou suffer agony, when thy consolation is ever near thee ? (1)

Vidūshaka.—Let your Highness cease giving way to tears and abandoning all self-restraint; I have seen Vakulāvalikā, Mālavikā's dear friend, and I have given her that message which your Highness entrusted to me.[1]

---

[1] Literally, she has been caused to hear.

Funding by IKS-MoE

राजा— ततः किमुक्तवती ?

विदूषकः— विण्णवेहि भट्टारअं–अणुगहिदम्हि इमिणा णिओएण। किंदु सा तवस्सिणी देवीए अहिअदरं रक्खंतीए णाअरक्खिदो विअ णिही ण सुहं समासादइदव्वा। तह वि घटइस्सं त्ति। [विज्ञापय भट्टारकम्– अनुगृहीतास्म्यनेन नियोगेन। किंतु सा तपस्विनी देव्याधिकतरं रक्षन्त्या नागरक्षित इव निधिर्न सुखं समासादयितव्या। तथापि घटयिष्यामीति।]

राजा—भगवन् संकल्पयोने! प्रतिबन्धवत्स्वपि विषयेष्वभिनिवेश्य किं तथा प्रहरसि यथा जनोऽयं न कालान्तरक्षमो भवति ? (सविस्मयम्)

क्व रुजा हृदयप्रमाथिनी
क्व च ते विश्वसनीयमायुधम्।
मृदु तीक्ष्णतरं यदुच्यते
तदिदं मन्मथ! दृश्यते त्वयि ॥२॥

King.—What did she say then ?

Vidūshaka.—"Inform the King that I am favoured by having that duty entrusted to me. But the poor girl being guarded by the Queen more carefully than before, like the jewel[1] guarded by a snake, is not easily to be got at; nevertheless I will do my best."

King.—Oh revered God of Love, child of fancy, having directed my longing to objects unfortunately surrounded with obstacles, thou dost smite me so sorely that I am not able to bear delay. (*With an expression of astonishment*). What proportion is there between this soul-torturing agony and thy bow to all appearances so harmless ? That "sweet and bitter in a breath," of which we hear so much, is surely seen in thee, oh God of Desire ! (2)

---

[1] Alluding to the "precious jewel, which the snake, though 'ugly and venomous,' wears in his head," says Shankar Pandit. Another reading is *ṇidhī*, a treasure.

विदूषकः—णं भणामि तस्सिं साहणिज्जे कज्जे किदो मए उवाओवक्खेओत्ति । ता पज्जवत्थावेदु भवं अत्ताणं । [ननु भणामि तस्मिन्साधनीये कार्ये कृतो मयोपायोपक्षेप इति । तत्पर्यवस्थापयतु भवानात्मानम् ।]

राजा—अथेमं दिवसशेषमुचितव्यापारविमुखेन चेतसा क्व नु खलु यापयामि ? ।

विदूषकः—णं अज्ज एव्व पढमं वसंदावदारसूअआणि रत्तकुरवआणि उवाअणं पेसिअ णववसंतावदारव्ववदेसेण इरावदीए णिउणिआमुहेण पत्थिदो भवं 'इच्छामि अज्जउत्तेण सह दोलाहिरोहणं अणुहविदुं'त्ति । भवदा वि से पडिण्णादं । ता पमदवणं एव्व गच्छम्ह । [नन्वद्यैव प्रथमं वसन्तावतारसूचकानि रक्तकुरवकाण्युपायनं प्रेष्य नववसन्तावतारव्यपदेशेनेरावत्या निपुणिकामुखेन प्रार्थितो भवान् 'इच्छाम्यार्यपुत्रेण सह दोलाधिरोहणमनुभवितुम्' इति । भवताप्यस्यै प्रतिज्ञातम्, तत्प्रमदवनमेव गच्छावः ।

राजा—न क्षममिदम् ।

विदूषकः—कहं विअ ? [कथमिव ?]

Vidūshaka.—I tell you of a truth that I have devised an expedient for ensuring the end we wish to attain; therefore, royal sir, regain your composure.

King.—Well, where shall I manage to get through the rest of the day with a mind averse to my usual occupations?

Vidūshaka.—Surely, Irāvatī sent you this very day some red Kuravaka blossoms indicative of the first appearance of spring, and on the ground of the recent advent of that season made this request to you by the mouth of Nipuṇikā, "I wish to enjoy a ride in the swing in company with my husband." Your Highness, too, promised to gratify her; therefore, let us go to the pleasure-grounds.

King.—This is impossible.

Vidūshaka.—How so?

Funding by IKS-MoE

राजा—वयस्य ! निसर्गनिपुणाः स्त्रियः । कथं मामन्यसंक्रान्तहृदयमुपलालयन्तमपि ते सखी न लक्षयिष्यति ? अतः पश्यामि

उचितः प्रणयो वरं विहन्तुं
बहवः खण्डनहेतवो हि दृष्टाः ।
उपचारविधिर्मनस्विनीनां
न तु पूर्वाभ्यधिकोऽपि भावशून्यः ॥ ३ ॥

विदूषकः—णारिहदि भवं अंतेउरट्ठिदं दक्खिण्णं एक्कपदे पिट्ठदो कादुं । [नार्हति भवानन्तःपुरस्थितं दाक्षिण्यमेकपदे पृष्ठतः कर्तुम् ।]

राजा—(विचिन्त्य) तेन हि प्रमदवनमार्गमादेशय ।

विदूषकः—इदो इदो भवं । [इत इतो भवान् ।]

(उभौ परिक्रामतः)

विदूषकः—णं एदं पमदवणं पवणबलचलाहिं पल्लवंगुलीहिं तुवरेदि विअ

King.—My friend, women are by nature discerning. Now that my heart is devoted to another, how will your friend help perceiving it, even when I am caressing her ?

Therefore, I see clearly that it is better to refuse a proper request, for I know many plausible reasons for disappointing her, than to go through the form of shewing regard to sharp-sighted women, even if with more *empressement* than before, supposing it be void of passion.[1] (3)

Vidūshaka.—You ought not suddenly to throw behind your back your invariable courtesy to the ladies of your harem.

King (*reflecting*).—Then shew me the way to the pleasure-grounds.

Vidūshaka.—This way, this way, your Highness.

Both walk round

Vidūshaka.—The spring by means of these finger-like

---

1. *Pūrvābhyadhikaḥ* is explained by Tārānātha to mean *pūrvam abhyadhikaḥ*, *i. e.*, before excessive, but now void of passion.

भवंतं पवेसिदुं। [नन्वेतत्प्रमदवनं पवनबलचलाभिः पल्लवाङ्गुलीभिस्त्वरयतीव भवन्तं प्रवेष्टुम् ।]

राजा—(स्पर्शं रूपयित्वा) अभिजातः खलु वसन्तः । सखे ! पश्य

उन्मत्तानां श्रवणसुभगैः कूजितैः कोकिलानां
सानुक्रोशं मनसिजरुजः सह्यतां पृच्छतेव ।
अङ्गे चूतप्रसवसुरभिर्दक्षिणो मारुतो मे
सान्द्रस्पर्शः करतल इव व्यापृतो माधवेन ॥ ४ ॥

विदूषकः—पविस णिव्वुसदिलाहाअ । [प्रविश निर्वृतिलाभाय ।]

(उभौ प्रविशतः)

विदूषकः—अवधाणेण दिट्ठिं देहि । एदं खु भवंतं विअ विलोहइदुकामाए पमदवणलच्छीए जुवदीवेसलज्जावअत्तिअं वसंतकुसुमणेवत्थं गहिदं । [अवधानेन दृष्टिं देहि । एतत्खलु भवन्तमिव विलोभयितुकामया प्रमदवनलक्ष्म्या युवतिवेषलज्जापयितृकं वसन्तकुसुमनेपथ्यं गृहीतम् ।]

shoots, agitated by the wind, as it were, beckons on your Highness to enter this pleasure-ground,

King (making as if something were touching him).— Surely the Spring is noble in his sympathy. Observe, friend.

He as it were, compassionately asking by the notes of love-intoxicated cuckoos, agreeable to the ear, how I manage to bear the torture of my passion, has made the southern wind fragrant with mango-blossoms to play upon my body, like the palm of a hand gently stroking me. (4)

Vidūshaka.—Enter, that you may obtain tranquillity of mind.

Both enter the garden.

Vidūshaka.—Oh !my friend, look carefully around you, Surely the presiding goddess of the pleasure-grove must desire to allure you, since she has donned this robe of spring flowers that puts to shame the adornment of a young lady.

Funding by IKS-MoE

राजा—ननु विस्मयादवलोकयामि ।

रक्ताशोकरुचा विशेषिगुणो बिम्बाधरालक्तकः
प्रत्याख्यातविशेषकं कुरबकं श्यामावदातारुणम् ।
आक्रान्ता तिलकक्रिया च तिलकैर्लग्नद्विरेफाञ्जनैः
सावज्ञेव मुखप्रसाधनविधौ श्रीर्माधवी योषिताम् ॥ ५ ॥

(उभौ नाट्येनोद्यानशोभां निर्वर्णयतः)

(ततः प्रविशति पर्युत्सुका मालविका)

मालविका—अविण्णादहिअअं भट्टारअं अहिलसंदी अत्तणो वि दाव लज्जेमि । कुदो विहवो सिणिद्धस्स सहीजणस्स इमं वुत्तंतं आचक्खिदुं ? ण जाणे अप्पडिआरगरुअं वेअणं केत्तिअं कालं मअणो मं णइस्सदित्ति । (इति कतिचित्पदानि गत्वा) आ, कहिं खु पत्थिदम्हि ? (इति स्मृतिमभिनीय) आदिट्ठम्हि देवीए—'मालविए ! गोदमचापलादो दोलापरिब्भट्टाए सरुजौ मह चलणौ । तुमं दाव गदुअ तवणीआसोअस्स दोहलं णिवट्टेहि त्ति' । जइ सो पञ्चरत्तब्भंतरे कुसुमं दंसेदि तदो

King.—Indeed, I behold it with astonishment.

The red dye of the *bimb*-like lip is surpassed in excellence by the splendour of the red *Aśoka* ; the *Kuravaka*-flower, dark-blue, white, and red, transcends the painting on the forehead ; the ornament of the spot between the eyebrows is surpassed by *tilaka*-blossoms having bees clinging to them black as *collyrium* ; the goddess of Vernal Beauty seems to laugh to scorn the art of adorning the face[1] as practised by women. (5)

Both of them admire the beauty of the garden.

Enter Mālavikā in a state of agitation

Mālavikā.—I am ashamed in my own heart, when I think I am in love with the King, whose heart I do not know. How, then, can I tell this fact to my dear friend ? I do not know for how long a time love will bring me into this irremediably severe suffering. (*Having advanced some steps*). Where am I going now ? (*After reflecting*). Ah !

---

[1] Tārānātha reads *sukhaprasādhanavidhau*, the art of adornment without effort.

अहं अहिलासपूरइत्तअं पसादं दावइस्सं ति। ता जाव णिओअभूमिं पढमं गदा होमि, दाव अणुपदं मह चलणालंकारहत्थाए बउलावलिआए आअंदव्वं, ता परिदेवइस्सं ताव वीसद्धं मुहुत्तअं। [अविज्ञातहृदयं भर्तारमभिलषन्त्यात्मनोऽपि तावल्लज्जे। कुतो विभवः स्निग्धस्य सखीजनस्येमं वृत्तान्तमाख्यातुम्? न जानेऽप्रतिकारगुरुकां वेदनां कियन्तं कालं मदनो मां नेष्यतीति। आ, कुत्र खलु प्रस्थितास्मि? आदिष्टास्मि देव्या—'मालविके! गौतमचापलाद्दोलापरिभ्रष्टायाः सुरुजौ मम चरणौ। त्वं तावद्गत्वा तपनीयाशोकस्य दोहदं निर्वर्तय' इति। यद्यसौ पञ्चरात्राभ्यन्तरे कुसुमं दर्शयति, ततोऽहमभिलाषपूरयितृकं प्रसादं दापयिष्यामीति। तद्यावन्नियोगभूमिं प्रथमं गता भवामि, तावदनुपदं मम चरणालंकारहस्तया बकुलावलिकयागन्तव्यम्, तत्परिदेवयिष्ये तावद्विस्रब्धं मुहूर्तकम्।] (इति परिक्रामति)

विदूषकः—(दृष्ट्वा) ही ही, वअस्स! एदं खु सीहुपाणुव्वेजिदस्स मच्छंडिआ उवणादा। [आश्चर्यमाश्चर्यम्, वयस्य! एतत्खलु सीधुपानोद्वेजितस्य मत्स्यण्डिकोपनता।]

राजा—अये, किमेतत्?

I received this order from the Queen: "My feet hurt me "terribly, as I have had a fall from a swing, owing to the "carelessness- of Gautama, do thou therefore perform the "ceremony of fertilizing the golden Aśoka-tree; if in five "nights from this time it displays flowers, I will (*she stops "speaking and heaves a sigh*) bestow on thee a boon which will "gratify thy desires." Well I have come first to the place where I am to perform this duty. While I am waiting till Vakulāvalikā comes after me with the pigment for the feet, I will for a moment weep undisturbed. (*She walks round*).

Vidūshaka.—Ha! ha! here is fine sugar offered you, now that you are confused with drinking rum.[1]

King.—Ah! What is that?

---

[1] Shankar Pandit points out that fine sugar cures people under the influence of intoxication. Tārānātha also is of opinion that the inspissated juice of sugar-cane is good for people in that state.

Funding by IKS-MoE

विदूषकः—एसा णादिपरिक्खिदवेसा ऊसुअवअणा एआइणी मालविआ अदूरे वट्टदि । [एषा नातिपरिष्कृतवेषोत्सुकवदनैकाकिनी मालविकाऽदूरे वर्तते ।]

राजा—(सहर्षम्) कथं मालविका ।

विदूषकः—अह इं । [अथ किम् ।]

राजा—शक्यमिदानीं जीवितमवलम्बयितुम् ।

त्वदुपलभ्य समीपगतां प्रियां
हृदयमुच्छ्वसितं मम विक्लवम् ।
तरुवृतां पथिकस्य जलार्थिनः
सरितमारसितादिव सारसात् ॥६॥

अथ क्व तत्रभवती ?

विदूषकः—एसा तरुराइमज्झादो णिक्कंता इदो ज्जेव परिवट्टंती दीसइ । [एषा तरुराजिमध्यान्निष्क्रान्तेत एव परिवर्तमाना दृश्यते ।]

राजा—(विलोक्य, सहर्षम्) वयस्य ! पश्याम्येनाम् ।

विपुलं नितम्बदेशे मध्ये क्षामं समुन्नतं कुचयोः ।
अत्यायतं नयनयोर्मम जीवितमेतदायाति ॥७॥

Vidūshaka.—There stands Mālavikā at no great distance, somewhat insufficiently adorned, with the appearance of one afflicted with longing; and alone.

King (delighted).—What ! Mālavikā ?

Vidūshaka.—Certainly.

King.—Now my life may find support. Hearing from you that my beloved is near, my distracted heart once more revives, like the heart of a thirsty traveller when he learns from the cry of the *sārasa* that a tree-bordered river is near. Well ! Where is the lady ? (6)

Vidūshaka.—Here she is coming in this very direction, having emerged from the midst of a row of trees.

King.—My friend f behold her. Broad in her *bimba*-like hips, thin in the waist, swelling in the bosom, very long in the eyes, she—my life—is coming hither. (7)

Funding by IKS-MoE

सखे ! पूर्वस्मादतिमनोहरावस्थान्तरमुपारूढा तत्रभवती । तथा हि—

शरकाण्डपाण्डुगण्डस्थलेयमाभाति परिमिताभरणा ।
माधवपरिणतपत्रा कतिपयकुसुमेव कुन्दलता ॥८॥

विदूषकः—एसा वि भवं विअ मअणव्वाहिणा परिमिट्ठा भविस्सदि । [एषापि भवानिव मदनव्याधिना परिमृष्टा भविष्यति ।]

राजा—सौहार्दमेवं पश्यति ।

मालविका—अअं सो ललिदसुउमालदोहलापेक्खी अगिहीदकुसुमणेवत्थे उक्कंठिदाए मह अणुकरेदि असोओ । जाव एदस्स पच्छाअसीदले सिलापट्टए णिसण्णा अत्ताणं विणोदेमि । [अयं स ललितसुकुमारदोहदापेक्षी अनुगृहीतकुसुमनेपथ्य उत्कण्ठितया ममाऽनुकरोत्यशोकः । यावदस्य प्रच्छायशीतले शिलापट्टके निषण्णात्मानं विनोदयामि ।]

विदूषकः—सुदं भवदा, उक्कंठिदम्हि त्ति तत्तहोदी मंतेदि । [श्रुतं भवता, उत्कण्ठितास्मीति तत्रभवती मन्त्रयते ।]

My friend, the lady is in a different state from what she was in before.

For she, with her cheeks pale like the inner part of the *sara* grass,[1] and but few ornaments, appears like the jasmine-creeper having its leaves developed in the spring, and with only a few flowers. (8)

Vidūshaka.—She, too, like your Highness, must be slightly affected with love-sickness.

King.—It is only friendship that sees that.

Mālavikā.—This Aśoka, that is waiting for the tender touch of a lady's foot, and has not assumed its robe of flowers, imitates me in my state of longing expectation, therefore let me sit down on this slab of rock cool with the shade of the tree, and refresh myself.

Vidūshaka.—Did your Highness hear ? The lady said "I am in a state of longing."

---

[1] Saccharum Sara (Monier Williams).

राजा—नैतावता भवन्तं प्रसन्नतकं मन्ये । कुतः ?

वोढा कुरवकरजसां किसलयपुटभेदशीकरानुगतः ।
अनिमित्तोत्कण्ठामपि जनयति मनसो मलयवातः ॥९॥

(मालविकोपविष्टा)

राजा— सखे ! इतस्तावदावां लतान्तरितौ भवावः ।

विदूषकः—इरावदिं विअ अदूरे पेक्खामि । [इरावतीमिवादूरे प्रेक्षे ।]

राजा—नहि कमलिनीं दृष्ट्वा ग्राहमवेक्षते मतङ्गजः । (इति विलोकयन्स्थितः)

मालविका—हिअअ ! णिरवलंबणादो अदिभूलिलंघिणो दे मणोरहादो विरम; किं मं आआसिअ ? [हृदय ! निरवलम्बनादतिभूमिलङ्घिनस्ते मनोरथाद्विरम; किं मामायास्य ?]

King.—Even this much does not make me think you a man of unerring insight.

For this wind from the Malaya mountain, laden with the pollen of the *kuravaka* flowers, accompanied with drops of water issuing from the opening folds of the buds, produces longing in the mind even without definite cause. (9)

Mālavikā sits down.

King.—My friend. come this way, let us hide behind the creeper.

Vidūshaka,—I think, I see Irāvati in the distance.

King..—But when he sees a cluster of lotuses, the elephant does not care for the alligator. (*He stands gazing.*)

Mālavikā.—Cease, my heart, from entertaining a baseless and extravagant wish. Why dost thou torture me ?

Funding by IKS-MoE

(विदूषको राजानं वीक्षते)

राजा—प्रिये ! पश्य वामत्वं स्नेहस्य ।

औत्सुक्यहेतुं विवृणोषि न त्वं
तत्त्वावबोधैकफलो न तर्कः ।
तथापि रम्भोरु ! करोमि लक्ष्य-
मात्मानमेषां परिदेवितानाम् ॥१०॥

विदूषकः—संपदं भवदो णिस्संसअं भविस्सदि । एसा अप्पिदमअणसंदेसा विवित्ते णं बउलावलिआ उवट्ठिदा । [साम्प्रतं भवतो निःसंशयं भविष्यति । एषार्पितमदनसंदेशा विविक्ते ननु बकुलावलिकोपस्थिता ।]

राजा—अपि स्मरेदसावस्मदभ्यर्थनाम् ?

विदूषकः—कि दाणिं एसा दासीए दुहिता तुह गरुअं संदेसं विसुमरेदि ? अहं दाव ण विसुमरेमि । [किमिदानीमेषा दास्या दुहिता तव गुरुकं संदेशं विस्मरति ? अहं तावन्न विस्मरामि ।]

The Vidūshaka looks at the King.

King.—My beloved, observe the beautiful nature[1] of love.

Thou dost not reveal any cause of thy pining, nor is conjecture invariably to be relied upon,[2] nevertheless, beautiful one, I consider myself the theme of all these lamentations. (10)

Vidūshaka.—Now your Highness may be free from anxiety, for here comes Vakulāvalikā alone, she to whom I gave the message of love.

King—I wonder whether she will remember my petition.

Vidūshaka.—What ! Do you suppose that that daughter of a female slave will forget such a weighty message from your Highness ?

---

[1] Tārānātha reads *mahattvam*, the greatness, the mighty power.

[2] Literally, distinguished for the quality of being able to know only that which forms the truth. (S. P. P.)

(प्रविश्य चरणालंकारहस्ता बकुलावलिका)

बकुलावलिका—अवि सुहं सहीए ? [अपि सुखं सख्याः ?]

मालविका—अम्हो, बउलावलिआ उवट्ठिदा । सहि ! साअदं दे । उवविस । [अहो, बकुलावलिकोपस्थिता । सखि ! स्वागतं ते । उपविश ।]

बकुलावलिका—(उपविश्य) हला ! तुमं दाणि जोग्गदाए णिउत्ता । ता एक्कं दे चलणं उवणेहि जाव सालत्तअं सणेउरं अ करेमि । [सखि ! त्वमिदानीं योग्यतया नियुक्ता । तस्मादेकं ते चरणमुपनय यावत्सालक्तकं सनूपुरं च करोमि ।]

मालविका—(आत्मगतम्) हिअअ ! अलं सुहिददाए, उवट्ठिदो अअं विहवो । कहं दाणि अत्ताणं मोचेअं ? अहवा एदं एव्व मे मित्तमंडणं भविस्सदि । [हृदय ! अलं सुखितया, उपस्थितोऽयं विभवः । कथं वेदानीमात्मानं मोचयेयम् ? अथवा एतदेव मे मृत्युमण्डनं भविष्यति ।]

बकुलावलिका—किं विआरेसि ? ऊसुआ खु इमस्स तवणीआसोअस्स कुसुमोग्गमे देवी । [किं विचारयसि ? उत्सुका खल्वस्य तपनीयाशोकस्य कुसुमोद्गमे देवी ।]

Enter Vakulāvalikā, with the pigment for the feet in her hand.

Vakulāvalikā.—Is my friend happy ?

Mālavikā.—Ah ! here is Vakulāvalikā come. Welcome my friend, sit down.

Vakulāvalikā.—Ha ! you are now invested with an equality with the Queen, therefore give me one of your feet that I may paint it with lac, and put the anklet on it.

Mālavikā (to herself).—Heart ! do not consider thyself happy, because this office has revolved upon me. How can I now free myself ? Never mind ! This painting will certainly be my funeral adornment.

Vakulāvalikā.—What are you thinking of ? You know the Queen is anxious that that golden Aśoka-tree should put forth flowers.

Funding by IKS-MoE

राजा—कथमशोकदोहदनिमित्तोऽयमारम्भः ?

विदूषकः—किण्णु खु जाणासि तुमं–मह कालणादो देवी मं अंतेउरणेवच्छेण योजइस्सदि त्ति ? [किं न खलु जानासि त्वम्–मम कारणाद्देवी मामन्तःपुरनेपथ्येन योजयिष्यतीति ? ।]

मालविका—हला ! मरिसेहि दाव णं । [सखि ! मर्षय तावदेनम् ।] (इति पादमुपहरति)

बकुलावलिका—अइ ! सरीरअं सि मे । [अयि शरीरमसि मे ।]

(इति नाट्येन चरणसंस्कारमारभते)

राजा—

चरणान्तनिवेशितां प्रियायाः
सरसां पश्य वयस्य ! रागलेखाम् ।
प्रथमामिव पल्लवप्रसूतिं
हरदग्धस्य मनोभवद्रुमस्य ॥११॥

King.—What ! is all this preparation for the sake ot fulfilling the longing of the Aśoka ?

Vidushaka.—Why, do you not know that the Queen would not, without reason, cause her to be adorned with the ornaments of the harem ?

Mālavikā (*holds out her foot*)—Come, pardon me the trouble I am now giving you.

Vakulāvalikā.—Why, you are as dear to me as my own body. (*She pretends to begin the painting of Mālavikā's foot.*)

Ktng.—Friend ! observe the moist streak of colour placed upon the extremity of my darling's foot, like the first peeping forth of the bud of tree of love consumed by Śiva[1] (11)

---

[1] *Manobhava*, the mind-born, *i.e.*, Kāma, god of love, was consumed by the fire of Śiva s eye, and therefore called Ananga. Weber suggests that the myth was invented to explain the name. Perhaps *sarasāṃ* means charming as well as moist.

Funding by IKS-MoE

विदूषकः—चलणाणुरूवो तत्तहोदीए अहिआरो उवक्खित्तो। [चरणानुरूपस्तत्रभवत्या अधिकार उपक्षिप्तः।]

राजा—सम्यगाह भवान्।

नवकिसलयरागेणाग्रपादेन बाला
स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन।
अकुसुमितमशोकं दोहदापेक्षया वा
प्रणमितशिरसं वा कान्तमार्द्रापराधम् ॥१२॥

विदूषकः—पहरिस्सदि तत्तहोदी तुमं अवरद्धं। [प्रहरिष्यति तत्रभवती त्वामपराद्धम्।]

राजा—मूर्ध्ना प्रतिगृहीतं वचः सिद्धिदर्शिनो ब्राह्मणस्य।

Vidūshaka.—Truly, the ornamental painting laid on the foot of the lady suits it well.[1]

King.—Sir, you have spoken the exact truth.

The girl deserves to smite two things with this point of her foot, of the hue of a young bud, on which flashes the gleam of the nails, both the Aśoka that has not yet flowered as longing for the ceremony of the *dohada*, and her lover standing with bowed[2] head, having recently committed an offence. (12)

Vidūshaka.—You will have an opportunity of offending the lady.

King.—I accept the auspicious word of a Brāhman who foresees success.[3]

---

[1] Tārānātha reads *ahiāro ;* Bollensen *adhiāro*. Both mean the duty imposed, & c.

[2] *Praṇihita*, which Shankar Pandit reads, and *praṇamita*, the reading of Tārānātha's edition, are pretty nearly identical in meaning. The literal meaning of the former is, "laid down in front of (his mistress)."

[3] Shankar Pandit observes, "this does not refer to any knowledge that Vidūshaka possessed of the art of foretelling, but simply to the fact hat a blessing given by a Brāhman is fulfilled by the gods."

Funding by IKS-MoE

(ततः प्रविशति युक्तमदा इरावती चेटी च)

इरावती— हञ्जे णिउणिए ! सुणामि बहुसो मदो किल इत्थिआजणस्स विसेसमंडणं त्ति । अवि सच्चो एसो लोअवाओ ? [हञ्जे निउणिके ! शृणोमि बहुशो मदः किल स्त्रीजनस्य विशेषमण्डनमिति । अपि सत्य एष लोकवादः ?]

निपुणिका—पढमं लोअवाओ एव्व, अज्ज सच्चो संवुत्तो । [प्रथमं लोकवाद एव, अद्य सत्यः संवृत्तः ।]

इरावती—अलं मयि सिणेहेण । कहेहि कुदो दाणिं ओगमिदव्वं दोलाघरं पढमं गदो भट्टा ण वेत्ति । [अलं मयि स्नेहेन । कथय कुत इदानीमवगन्तव्य दोलागृहं प्रथमं गतो भर्ता न वेति ।]

निपुणिका—भट्टिणीए अखंडिदादो पणआदो । [भट्टिन्या अखण्डितात् प्रणयात् ।]

इरावती—अलं सेवाए; मज्झत्थदं परिगहिअ भणाहि । [अलं सेवया, मध्यस्थतां परिगृह्य भण ।]

Enter Irāvatī in a state of intoxication, and her attendant.

Irāvatī.—Nipuṇikā, my girl, I have often heard that intoxication is an especial ornament to women. Do you think that this popular saying is true ?

Nipuṇikā.—It was formerly a mere popular saying ; now it has become true,

Irāvatī.—Cease your flattering speeches. How did you discover, on the present occasion, that the King had gone on before me to the house in which the swing is ?

Nipuṇikā.—I inferred it from his unfailing affection for you, his Queen.

Irāvatī.—No more of that adulation, speak as if you were an indifferent person.

Funding by IKS-MoE

निपुणिका—वसंतोस्सुवुवाअणलोलुवेण अज्जगोदमेण कहिअं तुवरदु भट्टिणी त्ति। [वसन्तोत्सवोपायनलोलुपेनार्यगौतमेन कथितं त्वरतां भट्टिनीति।]

इरावती—(अवस्थासदृशं परिक्रम्य) हञ्जे ! मदेण किलाअमाणं अत्ताणं अज्जउत्तस्स दंसणे हिअअं तुवरेदि। चलणा उण ण मह पसरंदि। [हञ्जे ! मदेन क्लाम्यमानमात्मानमार्यपुत्रस्य दर्शने हृदयं त्वरयति। चरणौ पुनर्न मम प्रसरतः।]

निपुणिका—णं संपत्तम्ह दोलाघरं। [ननु संप्राप्ते स्वो दोलागृहम्।]

इरावती—णिउणिए ! अज्जउत्तो एत्थ ण दीसदि। [निपुणिके ! आर्यपुत्रोऽत्र न दृश्यते।]

निपुणिका—णं भट्टिणीए ओलोअदु। परिहासणिमित्तं कहिं वि अदिट्ठेण भत्तुणा होदव्वं। अम्हे वि पिअंगुलदापरिक्खित्तं असोअसिलापट्टअं पविसम्ह। [ननु भट्टिन्यवलोकयतु। परिहासनिमित्तं कुत्राप्यदृष्टेन भर्त्रा भवितव्यम्। आवामपि प्रियङ्गुलतापरिक्षिप्तमशोकशिलापट्टकं प्रविशावः।]

इरावती—तह। [तथा।]

Nipuṇikā.—The noble Gautama told me, being desirous of a spring-gift. Let your Highness come quickly.

Irāvatī (walking round as well as her state will permit).—Oh! my heart urges me on to behold my husband, though I am overpowered with intoxication, but my feet will not advance on the path.

Nipuṇikā.—Now, indeed, we have arrived at the summer-house where the swing is.

Irāvatī.—But, Nipuṇikā, I do not see my hushand in it.

Nipuṇikā.—You must look carefully. The King must be hidden somewhere, meaning to play your Highness a trick. Let us for our part repair to this slab of rock under the Aśoka-tree which is overgrown by the Priyangu creeper.

Irāvatī :—Does so.

Funding by IKS-MoE

निपुणिका—(विलोक्य) ओलोअदु भट्टिणी चूदंकुरं विचिणतीणं पिपीलिआहिं दंसिदं । [अवलोकयतु भट्टिनी चूतांकुरं विचिन्वत्योः पिपीलिकाभिदंष्टम् ।]

इरावती—कहं विअ एदं ? [कथमिवेदम ?]

निपुणिका—एसा असोअपादवच्छाआए मालविआए बउलावलिआ चलणालंकारं णिव्वट्टेदि । [एषाऽशोकपादपच्छायां मालविकाया बकुलावलिका चरणालंकारं निर्वर्तयति ।]

इरावती—(शङ्कां रूपयित्वा) अभूमी अअं मालविआए, कहं एत्थ तक्केसि ? [अभूमिरियं मालविकायाः, कथमत्र तर्कयसि ?]

निपुणिका—तक्केमि दोलापरिब्भंसिदाए सरुअचलणाए देवीए असोअदोहलाहिआरे मालविआ णिवुत्तेत्ति । अण्णहा कहं देवी सअंधारिअं णेउरजुअलं परिअणस्स अब्भणुजाणिस्सदि ? [तर्कयामि दोलापरिभ्रष्टया सरुजचरणया देव्याऽशोकदोहदाधिकारे मालविका नियुक्तेति । अन्यथा कथं देवी स्वयंधारितं नूपुरयुगुलं परिजनस्याभ्यनुज्ञास्यति ?]

Nipuṇikā (*walking round and looking*).—Observe, your Highness! While seeking for the sprout of the mango, we are bitten by red ants.

Irāvatī.—What does that mean ?

Nipuṇikā.—Here is Vakulāvalikā adorning the foot of Mālavikā in the shade of the Aśoka-tree.

Irāvatī (*exhibiting signs of suspicion*).—This is not a proper place for Mālavikā. What conjecture do you form ?

Nipunikā.—I conjecture that the Queen, who has had a fall[1] from a swing, has appointed Mālavikā to perform the ceremony of the *dohada* for the Aśoka- tree, otherwise how could she have permitted her attendant to wear this pair of anklets which she herself uses ?

---

[1] Tarkavāgiśa reads the Prākrita equivalent of *dolā-paribhrasṭha-saruja-charaṇayā*, whose feet are painful owing to a fall.

Funding by IKS-MoE

इरावती—महदी खु से संभावणा । [महती खल्वस्याः संभावना ।]

निपुणिका—किं ण अण्णेसीअदि भट्टा ? [किं नान्विष्यते भर्ता ?]

इरावती—हला ! ण मे चलणा अण्णदो पवट्टंति । मणो मं विआरेदि । आसंकिदस्स दाव अंतं गमिस्सं । (मालविकां निर्वर्ण्य निरूप्यात्मगतम्) ठाणे खु कादरं मे हिअअ । सखि ! न मे चरणावन्यतः प्रवर्त्तेते । मनो मां विकारयति । आशङ्कितस्य तावदन्तं गमिष्यामि । स्थाने खलु कातरं मे हृदयम् ।]

बकुलावलिका—(मालविकायै चरणं दर्शयन्ती) अवि रोअदि दे राअरेहाविण्णासो ? [अपि रोचते ते रागरेखाविन्यासः ? ।]

मालविका—हला ! अत्तणो चलणं त्ति लज्जेमि णं पसंसिदुं । तेण पसाहणकलाए अहिणीदासि । [सखि ! आत्मनश्चरण इति लज्जे एनं प्रशंसितुम् । तेन प्रसाधनकलायामभिनीतासि ।]

Irāvati.—It is certainly a great honour to her.[1]

Nipunikā.—Why do you not search for your husband ?

Irāvati.—Girl, my feet refuse to go to any other place. My mind is distracted[2] : I will, in the meantime, arrive at certainty with respect to my suspicions.[3] (*Observing Mālavikā, to herself*) Not without reason is my mind despondent.[4]

Vakulāvalikā (*calling attention to Mālavikās foot*).—Are you pleased with the way in which the lines of colour are arranged on your foot ?

Mālavikā.—As it is on my own foot, I am ashamed to praise your handiwork. Tell me who instructed you in the art of adornment.

---

[1] Bollensen reads *me* for *se*, and explains *sambhāvanā* as suspicion.

[2] Tārānātha and Bollensen read the Prākrit equivalent of "*mado mām vikārayati,*" intoxication quite upsets me.

[3] *i.e.*, ascertain whether the King is in love with Mālavikā or not.

[4] She is struck with Mālavikā's beauty. (Shankar Pandit).

बकुलावलिका—एत्थ खु भत्तुणो सीसम्हि । [अत्र खलु भर्तुः शिष्यास्मि ।]

विदूषकः—तुवरेहि दाव णं गुरुदक्खिणाए । [त्वरय तावदेनां गुरुदक्षिणायै ।]

मालविका— दिट्ठिआ ण गव्विदासि । [दिष्ट्या न गर्वितासि ।]

बकुलावलिका—उवदेसाणुरूवा चलणा लंभिअ अज्ज दाव गव्विदा भविस्सं । (रागं विलोक्यात्मगतम्) हंत, सिद्धं मे दुत्थं । (प्रकाशम्) सहि ! एक्कस्स दे चलणस्स अवसिदो राअणिक्खेवो । केवलं मुहमारुदो लभइदव्वो । अहवा पवादं एदं ठाणं । [उपदेशानुरूपौ चरणौ लब्ध्वाद्य तावद्गर्विता भविष्यामि । हन्त, सिद्धं मे दूत्यम् । सखि ! एकस्य ते चरणस्यावसितो रागनिक्षेपः । केवलं मुखमारुतो लम्भयितव्यः । अथवा प्रवातमेतत्स्थानम् ।]

राजा—सखे ! पश्य ।

आर्द्रालक्तकमस्याश्चरणं मुखमारुतेन शोषयितुम् ।
प्रतिपन्नः प्रथमतरः संप्रति सेवावकाशो मे ॥ १३ ॥

Vakulāvalikā.—In this I am a pupil of the King.

Vidūshaka.—Hasten now to get the teacher's complimentary present.

Mālavikā.—I am glad to see that you are not conceited.

Vakulāvalikā.—Having obtained feet worthy of displaying my skill upon, I shall become conceited now. (*To herself*) I have accomplished my commission[1] (*Lookig at the colour, aloud*) My friend, I have finished painting one of your feet. It is only necessary to breathe on it.[2] Besides, this place is windy.

King.—My friend, observe, observe.

Now there has arrived an admirable opportunity for me
to do her a service by fanning with the breath of my mouth
her foot, the dye on which is wet. (13)

---

[1] Bollensen and Taranātha read *siddho me dappo*, my pride is now complete.

[2] Literally, to apply the wind of the mouth.

विदूषकः—कुदो दे अणुसओ ? एदं भवदा चिरक्कमेण अणुभविदव्वं। [कुतस्तेऽनुशयः ? एतावद्भवता चिरक्रमेणानुभवितव्यम् ।]

बकुलावलिका—सहि ! अरुणसतपत्तं विअ सोहदि दे चलणो सव्वहा भत्तुणो अंकपरिवट्टिणी होहि। [सखि ! अरुणशतपत्रमिव शोभते ते चरणः। सर्वथा भर्तुरङ्कपरिवर्तिनी भव ।]

(इरावती निपुणिकामवेक्षते)

राजा—ममेयमाशीः ।

मालविका—हला ! मा अवअणीअं मंतेहि। [सखि ! मा अवचनीयं मन्त्रयस्व ।]

बकुलावलिका—मंतइदव्वं एव्व मंतिदं मए। [मन्त्रयितव्यमेव मन्त्रितं मया]

मालविका—पिआ खु अहं तव। [प्रिया खल्वहं तव ।]

बकुलावलिका—ण केवलं मह। [न केवलं मम।]

मालविका—कस्स वा अण्णस्स ? [कस्य वाऽन्यस्य ।]

Vidūshaka.—Why do you regret that you cannot avail yourself of it ? You will soon be able to enjoy this privilege for a long time.

Vakulāvalikā.—Your foot shews like a red lotus. May you certainly repose upon the bosom of the King.

Irāvati looks Nipunikā in the face.

King.—I say Amen to this prayer.

Mālavikā.—Ah ! you are talking nonsence.[1]

Vakulāvalikā.—I said exactly what it is my business to say.[2]

Mālavikā.—Surely you love me, do you not ?

Vakulāvalikā.—I am not the only person who loves you.

Mālavikā.—Who else then loves me ?

---

[1] Bollensen reads *mā aviniam mantehi*; do not say what is unbecoming

[2] *i.e.*, as having been commissioned by the King.

Funding by IKS-MoE

बकुलावलिका—गुणेसु अहिणिवेसिणो भत्तुणो वि। [गुणेष्वभिनिवेशिनो भर्तुरपि।]

मालविका—अलीअं मंतेसि। एदं एव्व मयि णत्थि। [अलीकं मन्त्रयसे। एतदेव मयि नास्ति।]

बकुलावलिका—सच्चं तुयि णत्थि। भत्तुणो किसेसु सुंदरपांडुरेसु दीसइ अंगेसु। [सत्यं त्वयि नास्ति। भर्तुः कृशेषु सुन्दरपाण्डुरेषु दृश्यतेऽङ्गेषु।]

निपुणिका—पढमं भणिदं विअ हदासाए उत्तरं। [प्रथमं भणितमिव हताशाया उत्तरम्।]

बकुलावलिका—अणुराओ अणुराएण परिक्खिदव्वो त्ति सुअणवअणं पमाणीकरेहि। [अनुरागोऽनुरागेण परीक्षितव्य इति सुजनवचनं प्रमाणीकुरु।]

मालविका - किं अत्तणो छंदेण मंतेसि ? [किमात्मनश्छन्देन मन्त्रयसि ?]

Vakulāvalikā.—Why, the, King also who always has an eye for good qualities.

Mālavikā.—You are saying what is false. These good qualities are not in me.[1]

Vakulāvalikā.—Are they really not in you ? They are seen in the emaciated and slightly pale limbs of the King.

Nipuṇikā—The wench gives her answer as if she had got it all up beforehand.

Vakulāvalikā.—Regulate your conduct according to the maxim of the good, that love must be tested[2] by love.

Mālavikā.—What are you chattering there at your own sweet will ?

---

[1] See the critical note in Shankar Pandit's edition.

[2] Kāṭayavema reads, in his *chhāyā*, *pratyeshṭavyo*, to be received.

बकुलावलिका—णहि णहि; भत्तुणो खु एदाइं पणअमिदुलाइं अक्खराइं वत्तंतरिदाइं। [नहि नहि भर्तुः खल्वेतानि प्रणयमृदुलान्यक्षराणि वक्त्रान्तरितानि।]

मालविका—हला ! देविं चिंतिअ ण मे हिअअं विस्ससदि। [सखि ! देवीं चिन्तयित्वा न मे हृदयं विश्वसिति।]

बकुलावलिका—मुद्धे ! भमरसंबाधो त्ति वसंतावदारसव्वसस्सं किं ण चूदप्पसवो ओदंसिदव्वो ? [मुग्धे ! भ्रमरसंपातो भविष्यतीति वसन्तावतारसर्वस्वं किं न चूतप्रसवोऽवतंसितव्यः ?]

मालविका—तुमं दाव दुज्जादे गच्छतस्य सहाया होहि। [त्वं तावद्दुजति गच्छतः सहाया भव।]

बकुलावलिका—विमद्दसुरही बउलावलिआ खु अहं। [विमर्दसुरभिर्बकुलावलिका खल्वहम्।]

